द्वादश ज्योतिर्लिंग स्तोत्रं

द्वादश ज्योतिर्लिंग स्तोत्रं

सौराष्ट्रदेशे विशदेतिरम्ये
ज्योतिर्मयं चंद्रकळावतंसं |
भक्तप्रदानाय कृपावतीर्णं
तं सोमनाथं शरणं प्रपद्ये || 1 ||

श्रीशैलशृंगे विविधप्रसंगे
शेषाद्रिशृंगेऽपि सदा वसंतं |
तमर्जुनं मल्लिकपूर्वमेनं
नमामि संसारसमुद्रसेतुं || 2 ||

अवंतिकायां विहितावतारं
मुक्तिप्रदानाय च सज्जनानां |
अकालमृत्योः परिरक्षणार्थं
वंदे महाकालमहासुरेशं || 3 ||

कावेरिकानर्मदयोः पवित्रे
समागमे सज्जनतारणाय |
सदैव मांधातृपुरे वसंतं
ओंकारमीशं शिवमेकमीडे || 4 ||

पूर्वोत्तरे प्रज्वलिकानिधाने
सदा वसंतं गिरिजासमेतं |
सुरासुराराधितपादपद्मं
श्रीवैद्यनाथं तमहं नमामि || 5 ||

याम्ये सदंगे नगरेऽतिरम्ये
विभूषितांगं विविधैश्च भोगैः |
सद्भक्तिमुक्तिप्रदमीशमेकं
श्रीनागनाथं शरणं प्रपद्ये || 6 ||

महाद्रिपार्श्वे च तटे रमंतं
संपूज्यमानं सततं मुनींद्रैः |
सुरासुरैर्यक्षमहोरगाद्यैः
केदारमीशं शिवमेकमीडे || 7 ||

सह्याद्रिशीर्षे विमले वसंतं
गोदावरीतीरपवित्रदेशे |
यद्दर्शनात्पातकमाशु नाशं
प्रयाति तं त्र्यंबकमीशमीडे || 8 ||

सुताम्रपर्णीजलराशियोगे
निबध्य सेतुं विशिखैरसंख्यैः |
श्रीरामचंद्रेण समर्पितं तं
रामेश्वराख्यं नियतं नमामि || 9 ||

यं डाकिनीशाकिनीकासमाजे
निषेव्यमाणं पिशिताशनैश्च |
सदैव भीमादिपदप्रसिद्धं
तं शंकरं भक्तहितं नमामि || 10 ||

सानंदमानंदवने वसंत-
-मानंदकंदं हतपापबृंदं |
वाराणसीनाथमनाथनाथं
श्रीविश्वनाथं शरणं प्रपद्ये || 11 ||

इलापुरे रम्यविशालकेऽस्मिन्
समुल्लसंतं च जगद्वरेण्यं |
वंदे महोदारतरस्वभावं
घृष्णेश्वराख्यं शरणं प्रपद्ये || 12 ||

ज्योतिर्मयद्वादशलिंगकानां
शिवात्मनां प्रोक्तमिदं क्रमेण |
स्तोत्रं पठित्वा मनुजोऽतिभक्त्या
फलं तदालोक्य निजं भजेच्च || 13 ||

इति द्वादश ज्योतिर्लिंग स्तोत्रं ||